An International Multidisciplinary Journal
अनन्यशास्त्रम्™
(A Unique Treatise of Knowledge)
ISSN:3049-3927 (Online)

ANANYAŚĀSTRAM:
*An International Multidisciplinary Journal*
*(A Unique Treatise of Knowledge)*
**Peer-Reviewed | Refereed | Open Access Journal**
DOI: https://doi.org/10.64328/aimjv01i030049

**Volume: 01 | Issue: 03 | December: 2025**
**Review Article**

# धातोस्तन्निमित्तस्यैव इति सूत्रार्थसमीक्षणम्

**डॉ. आनन्द पण्ड्या[1]**

## लेखसारः

प्रस्तुतोऽयं शोधः "धातोस्तन्निमित्तस्यैव"[2] इति पाणिनिसूत्रमाधारीकृत्य लिखितो विद्यते। लेखेऽस्मिन् सर्वादौ सूत्रस्यास्य सामान्यतः परिचयं प्रदाय एतस्य नियामकत्वं प्रतिपाद्य तत्र चासाधारणं फलं प्रदर्श्य ,एवकारं विनापि नियमसम्भवे एवकारग्रहणं इष्टतो नियमलाभायावश्यकमिति यथासरलं प्रतिपादितम्।

## विषयप्रवेशः

सूत्रमिदं भगवता पाणिनिना प्रणीताया अष्टाध्याय्याः षष्ठाध्यायस्य प्रथमपादस्य अशीतितममस्ति । षड्विधसूत्रेषु नियमसूत्रमिदम् । "वान्तो यि प्रत्यये"[3] इति सूत्रं नियमयति अत्र सूत्रे त्रीणि पदानि सन्ति । धातोः इति षष्ठ्यन्तं पदं, तन्निमित्तस्य इति षष्ठ्यन्तं पदम्, एव इति अव्ययपदम् । तन्निमित्तस्य इत्यत्र बहुव्रीहिसमासः= सः (यादिप्रत्ययः) निमित्तं यस्य सः इति । सूत्रेऽस्मिन् "एचोऽयवायावः"[4] इति सूत्राद् एचः इति षष्ठ्यन्तं पदमनुवर्तते । "वान्तो यि प्रत्यये" इति सम्पूर्णं सूत्रमनुवर्तते। एवञ्च सूत्रार्थो भवति - यादिप्रत्यये परे धातोरेचः वान्तादेशो भवति चेत् तर्हि यादिप्रत्ययनिमित्तकस्य एव एचो भवति नान्यस्य इत्यर्थः । अत एव श्रीमद्भिः वैयाकरणसिद्धान्तकौमुद्यामुक्तम् - यादौ प्रत्यये परे धातोरेचश्चेद् वान्तादेशः तर्हि तन्निमित्तस्यैव इति । यथा- 'लव्यम् अवश्यलाव्यम्' इति । 'लूञ् छेदने' इत्यस्माद्धातोः "अचो यत्"[5] इत्यनेन यत्- प्रत्यये य इति आर्धधातुके प्रत्यये परे सति सार्वधातुकार्धातुकयोः इत्यनेन 'लू' इत्यस्य अङ्गस्य अन्त्यस्य ऊकारस्य गुणे कृते सति 'लो+य' इत्यवस्थायाम् ओकारस्य धात्ववयवत्वाद् यादिप्रत्ययनिमित्तकत्वाच्चानेन सूत्रेण वान्तादेशो 'लव्यम्' इति रूपं सिद्ध्यति ।

[1] सहायकाचार्यः, संस्कृतविभागः एम्. टी. बी. महाविद्यालयः, सूरतम्

[2].पाणिनिसूत्रम्, ६.१.८०॥
[3].पाणिनिसूत्रम्,६.१.७९॥
[4].पाणिनिसूत्रम्,६.१.७८॥
[5].पाणिनिसूत्रम्,३.१.९७॥

© 2025 Author(s). Published by Young India Publication, Gandhinagar, Gujarat, India

ANANYAŚĀSTRAM:
An International Multidisciplinary Journal
(A Unique Treatise of Knowledge)
ISSN : 3049-3927(Online)

एवमेव 'लूञ् छेदने' इत्यस्माद्धातोः "ओरावश्यके"[6] इत्यनेन अवश्यंभावी इत्यर्थे ण्यत् प्रत्ययेऽनुबन्धलोपे 'य' इति णित्-प्रत्यये परे सति 'लू'-घटकस्य ऊकारस्य "अचो ञ्णिति"[7] इत्यनेन सूत्रेण वृद्धौ 'अवश्यं लौ य' इत्यवस्थायां मयूरव्यंसकादित्वात् समासे

"लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि ।

समो वा हिततयोर्मांसस्य पचियुड्घञोः॥[8]

इति प्राचीनवैयाकरणकारिकया मलोपे अत्र औकारस्य धात्ववयवत्वाद् यादिप्रत्ययनिमित्तकत्वाच्च वान्तादेशः । अवश्यलाव्यम् इति रूपं सिद्ध्यति

ननु लव्यम् अवश्यलाव्यम् इत्यत्र तु "वान्तो यि प्रत्यये" इत्यनेनैव वान्तादेशः सिद्धः, किमर्थं सूत्रमिदं भगवता पाणिनिनारब्धं चेदुच्यते "*सिद्धे सत्यारम्भो नियमार्थम्*" । अत्र नियमस्य किं प्रयोजनम् इति चेत् रूपसिद्धिरेव प्रयोजनम् इति । तथाहि आङ् उपसर्ग पूर्वकात् 'वेञ् तन्तुसन्ताने' इत्यस्माद्धातोः कर्मणि लटि "भावकर्मणोः"[9] इत्यनेन आत्मनेपदे लटः स्थाने तप्रत्यये 'आ+वे+त' इत्यवस्थायां त-इति कर्मवाचके सार्वधातुके प्रत्यये परे सति "सार्वधातुके यक्"[10] इति सूत्रेण यक्-प्रत्ययेऽनुबन्धलोपे 'आ+वे+य+त' इत्यत्र य-इति कित्-प्रत्यये परे सति "वचिस्वपियजादीनां किति"[11] इत्यनेन वकारस्य सम्प्रसारणे उकारे "सम्प्रसारणाच्च"[12] इति पूर्वरूपे 'आ+उ+य+त' इत्यवस्थायाम् उकारस्य "अकृत्सार्वधातुकयोर्दीर्घः"[13] इत्यनेन दीर्घे आङा सह ऊकारस्य "आद्गुणः"[14] इत्यनेन गुणे 'ओ+यते' इत्यत्र ओकारस्य परादावद्भावेन धात्ववयवत्वेऽपि यादि प्रत्ययनिमित्तकत्वाभावादनेन सूत्रेण (अस्य सूत्रस्य ) नियमनात् वान्तादेशो न भवति।

ननु अत्र "आद्गुणः" इति गुणस्य ओकारस्य पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन वहिरङ्गतया वान्तादेशस्य एकपदसम्बन्धिवर्णद्वयापेक्षत्वेन अन्तरङ्गतया 'असिद्धं बहिरङ्गमन्तरङ्गे'[15] इति परिभाषया गुणस्य बहिरङ्गतया वान्तादेशे कर्तव्ये गुणस्य असिद्धत्वाद् ओकाराभावाद् वान्तादेशः प्राप्तिरेव नास्ति, अतः इदं नियमस्य असाधारणं प्रयोजनं भवितुं नार्हति ।

अत एव द्वितीयं प्रयोजनमाह - 'औयत' इति। केवलाद् 'वेञ् तन्तुसन्ताने' इत्यस्माद्धातोः कर्मणि लङि "भावकर्मणोः" इति सूत्रेणैव आत्मनेपदे लङः स्थाने तप्रत्यये "सार्वधातुके यक्" इत्यनेन यकि "वचिस्वपियजादीनां किति" इत्यनेन वकारस्य सम्प्रसारणे उकारे "सम्प्रसारणाच्च" इत्यनेन पूर्वरूपे 'उ+य+त' इत्यवस्थायाम् "अकृत्सार्वधातुकयोर्दीर्घः" उकारस्य दीर्घे

---

[6].पाणिनिसूत्रम्,३.१.१२५॥

[7].पाणिनिसूत्रम्,७.२.११५॥

[8].कात्यायनवार्तिकानि, सूत्र.सं ६.१.११४॥

[9].पाणिनिसूत्रम्,१.३.१३॥

[10].पाणिनिसूत्रम्,३.१.६७॥

[11].पाणिनिसूत्रम्,६.१.१५॥

[12].पाणिनिसूत्रम्,६.१.१०८॥

[13].पाणिनिसूत्रम्,७.४.२५॥

[14].पाणिनिसूत्रम्,६.१.८७॥

[15].परिभाषेन्दुशेखरः,प.सं.५०॥

ANANYAŚĀSTRAM:
An International Multidisciplinary Journal
(A Unique Treatise of Knowledge)
ISSN : 3049-3927(Online)

'ऊ+य+त' इत्यत्र "आडजादीनाम्"[16] इत्यनेन आडागमे "आटश्च"[17] इत्यनेन वृद्धौ कृतायाम् 'औ+यत इत्यत्र ओकारस्य परादावद्भावेन धात्ववयवत्वेऽपि यादि प्रत्ययनिमित्तकत्वाभावान्न वान्तादेशः। अत्र "आटश्च" इति पदद्वयसम्बन्धि वर्णद्वयापेक्षत्वाभावातद् बहिरङ्गत्वाभावान्न बहिरङ्गपरिभाषायाः प्रवृत्तिः ।

ननु अत्र सूत्रे एवकारः किमर्थः ? 'धातोस्तन्निमित्यस्य' इत्येव सूत्रमस्तु, न च तावन्मात्रोक्तौ एवकारघटित्वाभावेन शास्त्रस्य नियामकत्वं न स्याद्, इति चेत्, 'सिद्धे सत्यारम्भो नियमार्थः' नियमेनैव अस्य नियमविधित्वसिद्धे, तदर्थम् एवकारः अनावश्यक इति चेद्, उच्यते अत्र सूत्रे एवकारो विपरीतनियमो व्यावृत्यर्थः । एवकाराभावे हि '*यादिप्रत्ययनिमित्तकस्य च एचः वान्तादेशः भवति चेत् तर्हि धातोरेव एचो भवति*' इत्यपि नियमः प्रतीयेत । तथा सति 'बाभ्रव्य' इत्यत्र वान्तादेशो न स्यात् । तथाहि 'बभ्रोरपत्यम्' इत्यस्मिन् विग्रहे "मधुबभ्वोर्ब्राह्मणकौशिकयोः"[18] इत्यनेन यञ्-प्रत्ययेऽनुबन्धलोपे 'बभ्रु+ङस्+य' इत्यत्र "सुपो धातुप्रातिपदिकयोः"[19] इत्यनेन सुब्लुकि च कृते, बभ्रुघटक बकारपूर्ववर्ति आदि अकारस्य "तद्धितेष्वचामादेः"[20] इत्यनेन वृद्धौ, एवञ्च भकारोत्तरवर्ति उकारस्य "ओर्गुणः" इत्यनेन ओकारगुणे 'बाभ्रो+य' इत्यवस्थायाम् ओकारस्य यादिप्रत्ययनिमित्तकस्य धात्ववयवत्वाभावात्, 'यादिप्रत्ययनिमित्तकस्य एचः वान्तादेशः भवति चेत् तर्हि धातोरेव' इति नियमेन वान्तादेशो न स्यात् । अत एव इष्टनियमावधारणार्थं सूत्रे 'तन्निमित्तस्यैव' इत्यत्र एवकारः कृतः कृते तु 'यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव' इति इष्टनियमः सिद्ध्यति।एवञ्चैवकारोऽपि सार्थकः ॥

**उपसंहारः**

प्रस्तुतेऽस्मिन् शोधप्रबन्धे "धातोस्तन्निमित्तस्यैव" इति पाणिनिसूत्रस्य सूत्रार्थपरिचयः, अन्येन गतार्थत्वेन नियामकत्वम्, तस्य च प्रयोजनानि, इष्टतो नियमलाभाय एवकारेण नियामकत्वसिद्धिश्चेति विचाराः यथासरलं यथाप्रमाणं निरूपिता इति शम्।


- *वैयाकरणसिद्धान्तकौमुदी बालमनोरमा तत्त्वबोधिनीसहिता, मोतीलालबनारसीदासः १९६६॥*
- *नागोजिभट्टविरचितः परिभाषेन्दुशेखरः, भूतिभूषितः, चौखम्बा सुरभारती प्रकाशनम्, २०१२॥*
- *नागोजिभट्टविरचितः परिभाषेन्दुशेखरः, नागेशगूढार्थदीपिकासमवेतः, चौखम्बाविद्याभवनम्, वाराणसी १९५५॥*
- *महर्षिपतञ्जलिप्रणीतं महाभाष्यम्, प्रदीपोद्योतसमवेतम्, चौखम्बासंस्कृतप्रतिष्ठानम्, नवदेहली १९८७॥*
- *http.asthaadhyaayi.com*


[16].पाणिनिसूत्रम्,६.४.७२॥
[17]..पाणिनिसूत्रम्,६.१.९०॥
[18].पाणिनिसूत्रम्,४.१.१०६॥
[19].पाणिनिसूत्रम्,२.४.७१॥
[20].पाणिनिसूत्रम्,७.२.११७॥